श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री उत्तमूर् वीरराघवाचार्यमहादेशिक प्रणीतम्

# ॥ श्रीलक्ष्मीहयग्रीवध्यानम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness* *śrīmad āṇḍavan śrīraṅgam*

---

*The printed source of this stotra (Kadamba Mālā, pp. 193–196) contains numerous typographical errors. A best attempt has been made to correct them.*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीहयग्रीवध्यानम् ॥

विधिवद्विधिवन्दितौ पयोधौ
श्रुतिमन्वेषयितुं कृतावगाहौ।
मधुकैटभमर्दिनो मनोज्ञौ
मनवै ते चरणौ हयास्य देव ॥ 1 ॥

यदुदग्रजवोत्थसिन्धुभङ्ग -
व्रजघातक्षतपौरुषावुभौ तौ।
शयितं तु भवन्तमाप्य नष्टौ
तव जङ्घे हयवक्त्र मे हृदि स्ताम् ॥ 2 ॥

सितपद्मनिविष्ट यद्द्वयैक -
स्थितलक्ष्मीशुभलम्बिपादयुक्तः।
चरणस्तव दक्षिणः शरण्यं
मम वागीश तवोरुयुग्ममेतत् ॥ 3 ॥

प्रणमद्विधिवासभव्यपद्मं
शुभपीताम्बरशोभिदिव्यभूषम्।
अखिलाण्डसमुद्भवार्थनाभि
स्मरणे स्यादुदरं हयास्य ते मे ॥ 4 ॥

उपदेशकरेण दक्षिणेन
स्फुरितं पुस्तकधारिणा करेण।

अरिशङ्खनिवर्तितारिपाणि -
    द्वयमश्वास्य वपुस्तव स्मरेयम् ॥ 5 ॥

निखिलाश्रितजीवधीविकास -
    व्रजवद्भावितदीप्तिकौस्तुभाढ्यम् ।
कलितं वनमालया च वक्षस् -
    तव संश्लिष्य धिया हयास्य मोदे ॥ 6 ॥

निकटस्थितपाञ्चजन्यवाञ्छ्य -
    स्फुरदाकारशुभध्वनिं सुदीर्घाम् ।
परखण्डनतर्कबाणपूर्णे -
    षुधितुल्यां हयकन्धरां स्मरामि ॥ 7 ॥

अमृतायितहल्हलुक्तिधूता -
    खिलहालाहलरूपहैतुकोक्ति ।
वदनं सदनं करोत्वजस्रं
    हृदयं मे सदयं प्रभो हयास्य ॥ 8 ॥

तुरगास्यकटाक्षधारया त्वं
    कलुषव्रातमपास्य मे विधेहि ।
शठजिद्यतिराजवेदचूडा -
    गुरुसूक्त्यादृतसर्वतत्त्वबोधम् ॥ 9 ॥

श्रयदार्तिरवश्रुतीच्छयेव
    स्फुटमुन्नामितकर्णमश्ववक्त्र ।
स्फुटसान्द्रसटाजटाभिरामं
    रमयेन्मे हृदयं शिरस्त्वदीयम् ॥ 10 ॥

इति ते हयवक्त्र दिव्यरूपे
पदजङ्घोरुकटिक्रमेण पाणीन्।
हृदयं गलमास्यमक्षि शीर्षं
कलयेद्यः सकलाः कलास्तदाप्ताः ॥ **11** ॥

सितपद्मनिषण्णमम्बुजाक्षं
स्फटिकाद्रिप्रतिमं रमासमेतम्।
हयकण्ठमकुण्ठवाहिधीवाग् -
द्वयसिद्ध्या उषसि स्मरामि नित्यम् ॥ **12** ॥

अभिगन्तुमपि प्रपत्तुमेवं
गदितुं मङ्गलमातनोः स्तुतीस्त्वम्।
त्वदुपाश्रितमन्मुखेन पूर्वं
हयवक्त्राकृतिचिन्तनं त्विदानीम् ॥ **13** ॥

इति सन्ध्यसमीक्षितावदात -
स्फुटपूर्णाश्ववपुर्हयास्य भक्तः।
नवदेशिकवीरराघवार्यो
व्यतनोत्प्रातरुषस्सु चिन्तनार्थम् ॥ **14** ॥

विद्याविश्राणनोदन्तो हयग्रीवः परः पुमान्।
अनुग्रहं वितनुतामाश्रितेष्वनवग्रहम् ॥ **15** ॥

सेवे लक्ष्मीहयमुख कुरु त्वं दयां त्वत्पदाब्जे
जानुन्यूरौ घनकटितटे दिव्यपीताम्बराढ्ये।
कुक्षौ वक्षस्यपि च विपुले वैजयन्त्यादिभूषे
हस्ते पुस्तान्वयिनि ललिताक्षे सचक्रे सशङ्खे ॥ **16** ॥

दीर्घग्रीवामुखपुटमहानासिकागण्डपाली -
स्मेराम्भोजप्रतिमनयनभ्रूलसद्वक्त्रबिम्बे।
शीर्षे चोच्चे श्रवसि परितो विस्तृतायां सटायां
सृत्वा चिन्ता सुखमनुभवेच्छ्रीसखं त्वां समग्रम्॥ 17॥

॥ इति श्रीलक्ष्मीहयग्रीवध्यानं समाप्तम्॥